# मुकुन्दमाला स्तोत्रम्

घुष्यते यस्य नगरे रङ्गयात्रा दिने दिने ।
तमहं शिरसा वन्दे राजानं कुलशेखरम् ॥

श्रीवल्लभेति वरदेति दयापरेति
भक्तप्रियेति भव लुण्ठन कोविदेति ।
नाथेति नागशयनेति जगन्निवासेति
आलापनं प्रतिपदं कुरु मे मुकुन्द ॥ 1 ॥

जयतु जयतु देवो देवकी नन्दनोऽयं
जयतु जयतु कृष्णो वृष्णिवंश प्रदीपः ।
जयतु जयतु मेघश्यामलः कोमलाङ्गो
जयतु जयतु पृथ्वी भारनाशो मुकुन्दः ॥ 2 ॥

मुकुन्द मूर्ध्ना प्रणिपत्य याचे भवन्त मेकान्त मियन्त मर्थम् ।
अविस्मृति स्त्वच्चरणारविन्दे भवे भवे मेऽस्तु भवत्प्रसादात् ॥ 3 ॥

नाहं वन्दे तव चरणयो र्द्वन्द्व मद्वन्द्व हेतोः
कुम्भीपाकं गुरुमपि हरे नारकं नापनेतुम् ।
रम्या रामा मृदु तनुलता नन्दने नापि रन्तुं
भावे भावे हृदय भवने भावयेयं भवन्तम् ॥ 4 ॥

नास्था धर्मे न वसुनिचये नैव कामोपभोगे
यद्यद्भव्यं भवतु भगवन् पूर्व कर्मानुरूपम् ।

एतत्प्रार्थ्यं मम बहुमतं जन्म जन्मान्तरेऽपि
त्वत्पादाम्भोरुह युग गता निश्चला भक्तिरस्तु || 5 ||

दिवि वा भुवि वा ममास्तु वासो नरके वा नरकान्तक प्रकामम् ।
अवधीरित शारदा रविन्दौ चरणौ ते मरणेऽपि चिन्तयामि || 6 ||

कृष्ण त्वदीय पदपङ्कज पञ्जरान्तं
अद्यैव मे विशतु मानस राजहंसः ।
प्राण प्रयाण समये कफ वात पित्तैः
कण्ठावरोधन विधौ स्मरणं कुतस्ते || 7 ||

चिन्तयामि हरिमेव सन्ततं मन्दमन्द हसितान नाम्बुजं
नन्दगोप तनयं परात्परं नारदादि मुनि बृन्द वन्दितम् || 8 ||

करचरण सरोजे कान्तिम न्नेत्रमीने
श्रममुषि भुजवीचि व्याकुले ऽगाध मार्गे ।
हरिसरसि विगाह्यापीय तेजो जलौघं
भवमरु परिखिन्नः खेदमद्य त्यजामि || 9 ||

सरसिज नयने सशङ्ख चक्रे
मुरभिदि मा विरम स्वचित्त रन्तुम् ।
सुखतर मपरं न जातु जाने
हरिचरण स्मरणा मृतेन तुल्यम् || 10 ||

माभी र्मन्दमनो विचिन्त्य बहुधा यामीश्चिरं यातनाः

नामी नः प्रभवन्ति पाप रिपवः स्वामी ननु श्रीधरः ।
आलस्यं व्यपनीय भक्ति सुलभं ध्यायस्व नारायणं
लोकस्य व्यसनापनोदन करो दासस्य किं न क्षमः || 11 ||

भवजलधि गतानां द्वन्द्व वाता हतानां
सुत दुहितृ कलत्र त्राण भारार्दितानाम् ।
विषम विषय तोये मज्जता मप्लवानां
भवतु शरणमेको विष्णुपोतो नराणाम् || 12 ||

भवजलधि मगाधं दुस्तरं निस्तरेयं
कथमहमिति चेतो मा स्म गाः कातरत्वम् ।
सरसिज दृशि देवे तावकी भक्तिरेका
नरकभिदि निषण्णा तारयिष्य त्यवश्यम् || 13 ||

तृष्णातोये मदन पवनोद्धूत मोहोर्मिमाले
दारावर्ते तनय सहज ग्राह सङ्घाकुले च ।
संसाराख्ये महति जलधौ मज्जतां नस्त्रिधामन्
पादाम्भोजे वरद भवतो भक्तिनावं प्रयच्छ || 14 ||

माद्राक्षं क्षीणपुण्यान् क्षणमपि भवतो भक्तिहीनान्पदाब्जे
माश्रौषं श्राव्यबन्धं तव चरित मपास्यान्य दाख्यान जातम् ।
मास्मार्षं माधव त्वा मपि भुवनपते चेतसापह्नुवानान्
माभूवं त्वत्सपर्या व्यतिकर रहितो जन्म जन्मान्तरेऽपि || 15 ||

जिह्वे कीर्तय केशवं मुररिपुं चेतो भज श्रीधरं

पाणि द्वन्द्व समर्चयाच्युत कथाः श्रोत्रद्वय त्वं शृणु ।
कृष्णं लोकय लोचन द्वय हरे र्गच्छाङ्घ्रि युग्मालयं
जिघ्र घ्राण मुकुन्द पाद तुलसीं मूर्धन्नमाधोक्षजम् ॥ 16 ॥

हे लोकाः शृणुत प्रसूति मरण व्याधे श्चिकित्सा मिमां
योगज्ञाः समुदा हरन्ति मुनयो यां याज्ञवल्क्यादयः ।
अन्तर्ज्योति रमेय मेक ममृतं कृष्णाख्य मापीयतां
तत्पीतं परमौषधं वितनुते निर्वाण मात्यन्तिकम् ॥ 17 ।

हे मर्त्याः परमं हितं शृणुतवो वक्ष्यामि सङ्क्षेपतः
संसारार्णव मापदूर्मि बहुलं सम्यक्प्रविश्य स्थिताः ।
नानाज्ञान मपास्य चेतसि नमो नारायणाये त्यमुं
मन्त्रं सप्रणवं प्रणाम सहितं प्रावर्तयध्वं मुहुः ॥ 18 ॥

पृथ्वी रेणुरणुः पयांसि कणिकाः फल्गुः स्फुलिङ्गोऽनलः
तेजो निःश्वसनं मरुत्तनुतरं रन्ध्रं सुसूक्ष्मं नभः ।
क्षुद्रा रुद्र पिता महप्रभृतयः कीटाः समस्ताः सुराः
दृष्टे यत्र स तावको विजयते भूमा वधूता वधिः ॥ 19 ॥

बद्धेनाञ्जलिना नतेन शिरसा गात्रैः सरोमोद्गमैः
कण्ठेन स्वर गद्गदेन नयने नोद्गीर्ण बाष्पाम्बुना ।
नित्यं त्वच्चरणारविन्द युगल ध्याना मृता स्वादिनां
अस्माकं सरसीरुहाक्ष सततं सम्पद्यतां जीवितम् ॥ 20 ॥

हे गोपालक हे कृपा जलनिधे हे सिन्धु कन्यापते

हे कंसान्तक हे गजेन्द्र करुणा पारीण हे माधव ।
हे रामानुज हे जगत्त्रय गुरो हे पुण्डरीकाक्ष मां
हे गोपीजन नाथ पालय परं जानामि न त्वां विना ॥ 21 ॥

भक्तापाय भुजङ्ग गारुडमणि स्त्रैलोक्य रक्षामणिः
गोपी लोचन चात काम्बुदमणिः सौन्दर्य मुद्रामणिः ।
यः कान्तामणि रुक्मिणी घनकुच द्वन्द्वैक भूषामणिः
श्रेयो देव शिखामणि र्दिशतु नो गोपाल चूडामणिः ॥ 22 ॥

शत्रुच्छेदैक मन्त्रं सकल मुपनिषद्वाक्य सम्पूज्य मन्त्रं
संसारोत्तार मन्त्रं समुपचित तमः सङ्घ निर्याण मन्त्रम् ।
सर्वैश्वर्यैक मन्त्रं व्यसन भुजग सन्दष्ट सन्त्राण मन्त्रं
जिह्वे श्रीकृष्ण मन्त्रं जप जप सततं जन्म साफल्य मन्त्रम् ॥ 23 ॥

व्यामोह प्रशमौषधं मुनि मनोवृत्ति प्रवृत्त्यौषधं
दैत्येन्द्रार्तिक रौषधं त्रिभुवनी सञ्जीवनै कौषधम् ।
भक्तात्यन्त हितौषधं भवभय प्रध्वंसनै कौषधं
श्रेयःप्राप्तिक रौषधं पिब मनः श्रीकृष्ण दिव्यौषधम् ॥ 24 ॥

आम्नायाभ्य सनान्यरण्य रुदितं वेदव्रतान्यन्वहं
मेदश्छेद फलानि पूर्त विधयः सर्वे हुतं भस्मनि ।
तीर्थानामव गाहनानि च गजस्नानं विना यत्पद-
-द्वन्द्वाम्भोरुह संस्मृति र्विजयते देवः स नारायणः ॥ 25 ॥

श्रीमन्नाम प्रोच्य नारायणाख्यं के न प्रापु र्वाञ्छितं पापिनोऽपि ।

हा नः पूर्वं वाक्प्रवृत्ता न तस्मिन् तेन प्राप्तं गर्भवासादि दुःखम् ॥ 26 ॥

मज्जन्मनः फलमिदं मधुकैटभारे
मत्प्रार्थनीय मदनुग्रह एष एव ।
त्वद्भृत्य भृत्य परिचारक भृत्य भृत्य
भृत्यस्य भृत्य इति मां स्मर लोकनाथ ॥ 27 ॥

नाथे नः पुरुषोत्तमे त्रिजगता मेकाधिपे चेतसा
सेव्ये स्वस्य पदस्य दातरि सुरे नारायणे तिष्ठति ।
यं कञ्चित्पुरुषाधमं कतिपय ग्रामेश मल्पार्थदं
सेवायै मृगयामहे नरमहो मूका वराका वयम् ॥ 28 ॥

मदन परिहर स्थितिं मदीये मनसि मुकुन्द पदार विन्दधाम्नि ।
हर नयन कृशा नुना कृशोऽसि स्मरसि न चक्र पराक्रमं मुरारेः ॥ 29 ॥

तत्त्वं ब्रुवाणानि परं परस्मान् मधुक्षरन्तीव सतां फलानि ।
प्रावर्तय प्राञ्जलि रस्मि जिह्वे नामानि नारायण गोचराणि ॥ 30 ॥

इदं शरीरं परिणाम पेशलं पतत्यवश्यं श्लथसन्धि जर्जरम् ।
किमौषधैः क्लिश्यसि मूढ दुर्मते निरामयं कृष्ण रसायनं पिब ॥ 31 ॥

दारा वाराकर वरसुता ते तनूजो विरिञ्चिः
स्तोता वेदस्तव सुरगणो भृत्यवर्गः प्रसादः ।
मुक्तिर्माया जगदविकलं तावकी देवकी ते
माता मित्रं बलरिपु सुत स्त्वय्यतोऽन्यन्न जाने ॥ 32 ॥

कृष्णो रक्षतु नो जगत्त्रय गुरुः कृष्णं नमस्याम्यहं
कृष्णेनामर शत्रवो विनिहताः कृष्णाय तस्मै नमः ।
कृष्णादेव समुत्थितं जगदिदं कृष्णस्य दासोऽस्म्यहं
कृष्णे तिष्ठति सर्वमेत दखिलं हे कृष्ण रक्षस्व माम् ॥ 33 ॥

तत्त्वं प्रसीद भगवन् कुरु मय्यनाथे
विष्णो कृपां परम कारुणिकः किल त्वम् ।
संसार सागर निमग्न मनन्त दीनम्
उद्धर्तु मर्हसि हरे पुरुषोत्तमोऽसि ॥ 34 ॥

नमामि नारायण पादपङ्कजं करोमि नारायण पूजनं सदा ।
वदामि नारायणनाम निर्मलं स्मरामि नारायण तत्त्व मव्ययम् ॥ 35 ॥

श्रीनाथ नारायण वासुदेव श्रीकृष्ण भक्तप्रिय चक्रपाणे ।
श्रीपद्मनाभाच्युत कैटभारे श्रीराम पद्माक्ष हरे मुरारे ॥ 36 ॥

अनन्त वैकुण्ठ मुकुन्द कृष्ण गोविन्द दामोदर माधवेति ।
वक्तुं समर्थोऽपि न वक्ति कश्चित् अहो जनानां व्यसनाभिमुख्यम् ॥ 37 ॥

ध्यायन्ति ये विष्णु मनन्त मव्ययं
हृत्पद्म मध्ये सततं व्यवस्थितम् ।
समाहितानां सतताभय प्रदं
ते यान्ति सिद्धिं परमां च वैष्णवीम् ॥ 38 ॥

क्षीरसागर तरङ्ग शीकरा-ऽऽसार तारकित चारुमूर्तये ।
भोगि भोग शयनीय शायिने माधवाय मधु विद्विषे नमः || 39 ॥

यस्य प्रियौ श्रुतिधरौ कविलोक वीरौ
मित्रे द्विजन्म वर पद्म शरावभूताम् ।
तेनाम्बुजाक्ष चरणाम्बुज षट्पदेन
राज्ञा कृता कृतिरियं कुलशेखरेण || 40 ॥

इति कुलशेखर प्रणीतं मुकुन्दमाला स्तोत्रं सम्पूर्णम् ।